श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमन्निगमान्तमहादेशिकैरनुगृहीतं

# ॥ शतदूषणीस्थ श्रीहयग्रीवस्तोत्रम् ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ शतदूषणीस्थ श्रीहयग्रीवस्तोत्रम् ॥

श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

समाहारः साम्नां प्रतिपदमृचां धाम यजुषां
लयः प्रत्यूहानां लहरि विततिर्बोधजलधेः।
कथादर्पक्षुभ्यत्कलिकथक कोलाहलभवं
हरत्वन्तर्ध्वान्तं हयवदन हेषा हलहलः॥ 1 ॥

हयग्रीवसुधासिन्धुहर्षहेषारवोर्मयः।
जयन्ति वादवेलान्तक्षिप्तबाह्यकुदृष्टयः॥ 2 ॥

संप्रज्ञातस्थितिमधिगते निर्विकल्पे समाधौ
शान्तावद्यं स्तिमितबहुलानन्दसन्दोहमन्तः।
यत्तद्ब्रह्म स्फुरति यमिनां पूर्णषाड्गुण्यरूपं
सा मे नित्यं हृदि हयमुखी देवता सन्निधत्ताम्॥ 3 ॥

यदात्मानो वेदा यदनुगुणवर्णाकृतिजुषः
प्रमाणं यत्रैते नियतमपरिच्छेद्यविभवे।
य एषामाहर्ता दनुजमथनो वाजिवदनः
स मे देवः श्रीमान् विदलयतु सम्मोहमखिलम्॥ 4 ॥

अबाधादध्यक्षप्रभृति मितिवर्गेष्ववधृतं
शरीरं यस्येदं जगदखिलमन्तर्यमयितुः।
स मे तर्कैरेतैर्निजविभवलुण्ठाकमथनैः
प्रसीदत्वासीदन्निगमशतसीमा हयमुखः॥ 5 ॥

अज्ञानसन्तमसमाश्रयणोन्मुखानां
    संवित्प्रदीपमहसा सहसा निरुन्धन्।
विद्यास्वयंवरपतिर्व्यपहन्त्वविद्यां
    सर्वानुभूः स भगवान् पुरुषोत्तमो नः॥ 6 ॥

विदितमनुवदन्तो विश्वमेतद्यथावत्
    विदधति निगमान्ताः केवलं यन्मयत्वम्।
अविदितबहुभूमा नित्यमन्तर्विधत्तां
    हयवरवदनोऽसौ सन्निधिः सन्निधिं नः॥ 7 ॥

हयमुखमुखैस्तत्तद्रूपैरकर्मविनिर्मितैः
    उपदिशति यस्तथ्यं पथ्यं सतामवसीदताम्।
जननपदवीयातायातश्रमापहरां धियं
    जनयतु स मे देवः श्रीमान् धनञ्जयसारथिः॥ 8 ॥

नमस्त्रेधा विभक्तानामात्मनामन्तरात्मने।
ब्रह्मणे हयवक्त्राय बन्धमोक्षैकहेतवे॥ 9 ॥

य एको दुर्लङ्घ्यत्रिगुणनिजमायानिगलितैः
    विचित्रैः क्षेत्रज्ञैर्विहरति सरोजासहचरः।
जगत्सर्गक्षेमक्षपणपरिकर्मीणमहिमा
    दयालुर्देवोऽसौ तुरगवदनस्तारयतु नः॥ 10 ॥

अनन्यानां पुंसामनवधिकभक्तिस्थितिजुषाम्
    अविद्याध्वंसो यच्चरणवरिवस्यापरिणतेः।
तदेकं सत्संवित्सुखमवधिदूरीकृतगुणं
    हताशेषावद्यं हयवदनमीडीमहि महः॥ 11 ॥

हताशेषक्लेशा निरवधि महानन्दधनिनो
वयं भूयास्मेति स्थिरमनघवर्त्मन्यधिकृताः।
अनाघ्रातद्वन्द्वा हयमुखपदद्वन्द्वरुचयः
स्वदन्तां मे सन्तः श्रुतिजलधिमुष्टिन्धयधियः॥ **12** ॥

॥ श्रीहयग्रीवस्तोत्रं समाप्तम् ॥

कवितार्किकसिंहाय कल्याणगुणशालिने।
श्रीमते वेङ्कटेशाय वेदान्तगुरवे नमः॥